শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী নৃসিংহপুরাণে শ্রী মার্কণ্ডেয রিরচিতা

॥ শ্রী নৃসিংহস্তুতিঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী নৃসিংহস্তুতিঃ ॥

মার্কণ্ডেয উৱাচ

নরং নৃসিংহং নরনাথমচ্যুতং
প্রলম্ববাহুং কমলাযতেক্ষণম্।
ক্ষিতীশ্ৱরৈরর্চিতপাদপঙ্কজং
নমামি ৱিষ্ণুং পুরুষং পুরাতনম্॥ **1** ॥

জগৎপতিং ক্ষীরসমুদ্রমন্দিরং
তং শার্ঙ্গপাণিং মুনিৱৃন্দৱন্দিতম্।
শ্রিযঃ পতিং শ্রীধরমীশমীশ্ৱরং
নমামি গোৱিন্দমনন্তৱর্চসম্॥ **2** ॥

অজং ৱরেণ্যং জনদুঃখনাশনং
গুরুং পুরাণং পুরুষোত্তমং প্রভুম্।
সহস্রসূর্যদ্যুতিমন্তমচ্যুতং
নমামি ভক্ত্যা হরিমাদ্যমাধৱম্॥ **3** ॥

পুরস্কৃতং পুণ্যৱতাং পরাং গতিং
ক্ষিতীশ্ৱরং লোকপতিং প্রজাপতিম্।
পরম্পরাণামপি কারণং হরিং
নমামি লোকত্রযকর্মসাক্ষিণম্॥ **4** ॥

ভোগে ৎৱনন্তস্য পযোদধৌ সুরঃ
পুরা হি শেতে ভগৱাননাদিকৃৎ।

ক্ষীরোদৰীচীকণিকাম্বুনোক্ষিতং
তং শ্রীনিৱাসং প্রণতোস্মি কেশৱম্॥ **5**॥

যো নারসিংহং ৱপুরাস্থিতো মহান্
সুরো মুরারির্মধুকৈটভান্তকৃৎ।
সমস্তলোকার্তিহরং হিরণ্যকং
নমামি ৱিষ্ণুং সততং নমামি তম্॥ **6**॥

অনন্তমব্যক্তমতীন্দ্রিযং ৱিভুং
স্বে স্বে হি রূপে স্বযমেৱ সংস্থিতম্।
যোগশ্বরৈরেৱ সদা নমস্কৃতং
নমামি ভক্ত্যা সততং জনার্দনম্॥ **7**॥

আনন্দমেকং ৱিরজং ৱিদাত্মকং
ৱৃন্দালযং যোগিভিরেৱ পূজিতম্।
অণোরণীযাংসমৱৃদ্ধিমক্ষযং
নমামি ভক্তপ্রিযমীশ্বরং হরিম্॥ **8**॥

॥ শ্রী নৃসিংহস্তুতিঃ সমাপ্তা ॥